# सूत्रकृताङ्गोपनिषद्



# बुज्झिज्ज त्तिउट्टिज्जा

सर्वलब्धिनिधान पञ्चमगणधर

परमपूजनीयश्रीसुधर्मस्वामिभगवत्प्रणीत

सूत्रकृताङ्गसूत्रसारसञ्चयरूपा

# सूत्रकृताङ्गोपनिषद्

नवसर्जनम्-सम्पादनम्


प्राचीनश्रुतोद्धारक

प.पू.आ. श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ. श्रीकल्याणबोधिसूरीश्वराः



प्रकाशक

श्री जिनशासन आराधना ट्रस्ट

**મૂળ સૂત્ર** : **શ્રી સૂત્રકૃતાંગસૂત્ર**
(દ્વિતીય આગમ, ગ્રંથાગ્ર ૨૧૦૦, ભાષા- અર્ધમાગધી)

**અર્થાગમ** : ચરમતીર્થપતિ કરુણાસાગર શ્રમણ
ભગવાન શ્રી **મહાવીરસ્વામી**

**સૂત્રકાર** : પંચમગણધર સર્વલબ્ધિનિધાન
શ્રી **સુધર્માસ્વામી** ભગવાન

**સારસંચય** : **સૂત્રકૃતાંગોપનિષદ્**

**આલંબન** : મૂળ સૂત્ર અને અનેક ટીકાઓ

**સંચય+ સંપાદન** : પ્રાચીનશ્રુતોદ્ધારક આચાર્ય શ્રી **હેમચંદ્રસૂરિ**
શિષ્ય આચાર્ય **કલ્યાણબોધિસૂરિ**

**સહયોગ** : મુનિરાજશ્રી ભાવપ્રેમ-તત્ત્વપ્રેમ-
રાજપ્રેમવિજયજી મ.સા.

**પ્રકાશક** : શ્રી જિનશાસન આરાધના ટ્રસ્ટ

**મુદ્રક** : મલ્ટી ગ્રાફિક્સ
www.multygraphics.com

---

સને 2013 • પ્રથમ આવૃત્તિ • વિ.સં.૨૦૬૯ • વી.સં.૨૫૩૯

પ્રતિ : 500 • ₹ 60/-

*No Copyright. • Reproduction Welcome.*

## ❖ પ્રાપ્તિસ્થાન ❖

### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ

18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com

---

પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

## चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी



# અનરાધાર અનુગ્રહ



## अनन्तलब्धिनिधानः श्रीगौतमस्वामी

# पञ्चमगणधरः श्रीसुधर्मास्वामी



## કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

|| શ્રી પ્રેમ-ભુવનભાનુ-પદ્મ-જયઘોષ-હેમચન્દ્રસૂરિભ્યો નમઃ ||

# સોપાન

જે સાધકને સાધનાનું સમર્પણ કરે... જેના દ્વારા સાધક સિદ્ધિમાં પદાર્પણ કરે... એવું અદ્ભુત સૂત્ર છે સૂત્રકૃતાંગ. જેનો આ સારસંચય મૂળ સૂત્ર અને ટીકાના અધ્યયન તથા ધારણાનું આલંબન બને... સિદ્ધિનું સોપાન બને... એ જ શુભેચ્છા.

- આ. કલ્યાણબોધિસૂરિ

# विषयानुक्रमः



| श्रुत-स्कन्धः | अध्य-यनम् | नाम | पृष्ठम् |
|---|---|---|---|
| १ | १ | समयः | 2 |
| १ | २ | वैतालीयम् | 15 |
| १ | ३ | उपसर्गः | 25 |
| १ | ४ | स्त्रीपरिज्ञा | 35 |
| १ | ५ | नरकविभक्तिः | 42 |
| १ | ६ | महावीरस्तवः | 50 |
| १ | ७ | कुशीलपरिभाषा | 55 |
| १ | ८ | वीर्यम् | 59 |
| १ | ९ | धर्मः | 62 |
| १ | १० | समाधिः | 68 |
| १ | ११ | मार्गः | 71 |

| श्रुत–स्कन्धः | अध्य–यनम् | नाम | पृष्ठम् |
|---|---|---|---|
| १ | १२ | समवसरणम् | 74 |
| १ | १३ | याथातथ्यम् | 80 |
| १ | १४ | ग्रन्थः | 84 |
| १ | १५ | यदतीतम् | 89 |
| १ | १६ | षोडशम् | 91 |
| २ | १ | पुण्डरीकम् | 95 |
| २ | २ | क्रियास्थानम् | 97 |
| २ | ३ | आहारपरिज्ञा | 100 |
| २ | ४ | प्रत्याख्यानम् | 105 |
| २ | ५ | अनाचारश्रुतम् | 106 |
| २ | ६ | आर्द्रकीयम् | 107 |
| २ | ७ | नालन्दीयम् | 107 |

# अथ

# सूत्रकृताङ्गोपनिषद्

श्री वर्द्धमानं जिनवर्द्धमानं,
सूरीन्द्रमेवं गुरुहेमचन्द्रम्।
प्रणम्य नम्यं प्रचिनोमि रम्यं,
सुधोपमं सूत्रकृताङ्गसारम्॥

# समयः

## ॥१-१-१॥

बन्धनं बुध्येत परिज्ञाय च त्रोटयेत्। श्रीवीरः किमाह बन्धनं किं जानन् तत् त्रोटयतीति शिष्यप्रश्न उत्तरयति- अल्पमपि सचित्तादिपरिग्रहं कृत्वाऽ- नुज्ञाप्य वा न दुःखमोक्षः। कृता-

दिभिर्हिंसाप्रवृत्तेः कर्मवृद्धिः। बाध्यते स्वजनादिसक्तोऽज्ञः। न धनादि सर्वं त्राणाय, स्वल्पं च जीवितमतः प्रत्याख्याय धनादि मुच्येत कर्मणा। शाक्यादयस्त्वेतानर्हदुक्तान् ग्रन्थान् परित्यज्य परमार्थमजानाना अभि-निविष्टाश्च सक्ताः कामेषु। तन्मता-न्येवाह-

## (१) चार्वाकमतम्

पृथ्व्यादीनि पञ्चभूतानि। तेभ्य एव जीवोद्भवः। देहनाशे तन्नाशः। अतः परलोकिनोऽभावः, पुण्यादेरपि।

## (२) आत्माद्वैतमतम्

यथैकैव पृथ्वी निम्नाद्यवच्छेदतो नाना दृश्यते, एवमेक एव ज्ञानपिण्डः पृथ्व्यादिभूततया नाना दृश्यते। असदेतन्मतम्, एवं स्थिते प्रत्येकं पापफलभोगानुपपत्तेः।

## (३) अकारकवादिमतम्

नित्यस्यात्मनः कर्तृत्वानुपपत्तेरकारकः सः। एतदपि फल्गु, जगद्वैचित्र्यानुपपत्तेः।

## (४) आत्मषष्ठवादिमतम्

पञ्चमहाभूतान्यात्मषष्ठानि। आत्मा

लोकश्च शाश्वतः, तदुत्पादविनाशविर-
हात्। कृतनाशादिदोषादेतदप्यसत्।

## (५) बौद्धमतम्

क्षणिका रूपादिपञ्चस्कन्धाः, न तदन्यः कश्चिदात्मा। पृथिव्यादिचातुर्धातुकमिदं जगदित्यपि केचित्।

सर्वेऽप्येते मन्यन्ते यथा गृहिणः प्रव्रजिता वाऽप्यस्मद्दर्शनप्रतिपन्ना मुच्यन्ते सर्वदुःखेभ्यः, किन्तु न तेषां दुःखमोक्षः, धर्माद्यज्ञत्वात्तेषाम्। अतस्ते पुनः पुनः व्याध्याद्याकुले

संसारेऽनुभवन्ति विविधदुःखानि, एष्य-न्ति चानन्तशो गर्भमिति श्रीवीरोक्तिः।

॥१-१-२॥

## (६) नियतिवादिमतम्

सन्ति पृथग् जीवाः। वेदयन्ति च दुःखादि। किन्तु न तत् स्वकृतमन्यकृतं वा, अपि तु नियतिभवम्।

अज्ञा एते, नियतेतरानभिज्ञत्वात्। नैनं वादमाश्रित्य परलोकक्रियोपस्थिता-नामपि दुःखमोक्षः, पाशस्थत्वात्तेषाम्।

## (७) अज्ञानवादिमतम्

भेतव्यं ज्ञानतः, ततो मदादिप्रसूतेः।

असदेतत्, वेगवन्मृगचेष्टितं च। ते चाशङ्क्यानि स्थानानि शङ्कन्ते, वागुरादियुतानि शङ्क्यानि तु न शङ्कन्ते। ततश्च बध्यन्ते। एवं मिथ्यादृष्टयोऽनार्या एके श्रमणा धर्मप्रज्ञापनां शङ्कन्ते, न त्वारम्भान्। ततश्च ज्ञानप्राप्यात्कर्मक्षयाद् भ्रश्यन्त्येते। यास्यन्ति च विनाशमनन्तशः।

ननु चाज्ञानिन एव सर्वे जीवाः। यथा

म्लेच्छोऽम्लेच्छभाषितमनुभाषत एव, न तु तदभिप्रायं वेत्ति। एवं सर्वे जीवा अपि स्वकीयं ज्ञानं प्रमाणतया वदन्तोऽपि न निश्चयार्थं जानन्तीति चेत्?

न, अज्ञानैकान्त एतन्विमर्शरूपज्ञान-स्याप्यघटनात्। अपि चात्मनोऽपि तेऽज्ञानवादमनुशासितुमशक्ताः, कुतः स्वशिष्याणाम्? वनस्थमूढनेतृवत्। अन्धनायकाश्रितान्धवत्तच्चेष्टितमिति हृदयम्। एवं धर्मार्थमुद्यता अप्येतेऽधर्म-मापद्येरन्। ततश्च यथा शकुनिः

पञ्जरत्रोटनेऽसक्तः, एवमेतेऽपि धर्मा-धर्मानभिज्ञा दुःखत्रोटनेऽप्रत्यलाः।

अपि च स्वदर्शनप्रशंसापरवचोनिन्दासु प्रवणाः सर्वदा संसार उषिता भवन्ति। चैत्यकर्मादिका क्रियैव प्रधानं मोक्षाङ्गमित्येवं वादिनां दर्शनं संसार-प्रवर्धनम्, कर्मचिन्ताप्रनष्टत्वा-त्तेषाम्। तथाहि न ते हिंसाप्रवृत्तमनोवाग्भ्या-मनाभोगहिंसया स्वप्नकृतहिंसया वा कर्मबन्धं मन्यन्ते। ते कृतकारि-तानुमतिभिः कर्मबन्धः, भावविशुद्ध्या

तु नेति ब्रुवाणाः पुत्रहिंसकपितुस्त-न्मांसभोजिनो भावशुद्ध्या कर्ममुक्तत्वं प्रतिपादयन्ति। न तेऽवगच्छन्ति, यथैतत्कुर्वाणस्य भावविशुद्धिरेव न सङ्गतिमङ्गति, ततश्चावश्यं कर्मबन्ध इति।

यथा जात्यन्धः सच्छिद्रां नावमाश्रित्य पारं गन्तुमिच्छुरन्तरैव निमज्जति, एवं तेऽपि तीर्थिकाः संसारपारकाङ्क्षिणोऽ-प्यनुपर्यटन्ति संसारमिति।

॥१-१-३॥

यतीनुद्दिश्य पूतिकृतमपि सहस्रान्त-

रितमपि भुञ्जानो गृहिमुनिद्विपक्षसेवी, तत् स्वयं निष्पाद्य भुञ्जतां शाक्यादिनां सुतरां तत्प्रसङ्गः। एतदनभिज्ञास्ते समुद्रवेलायां नदीमुखविलग्नतया ढङ्कादिभिर्विलुप्यमाना मत्स्या इव विनाशमेष्यन्त्यनन्तशः।

देवोप्तो ब्रह्मोप्त इश्वरकृतः प्रधानादिकृतो विष्णुविहितोऽण्डकृतो वाऽयं लोक इत्यज्ञानिनां मतम्। न ते लोकनित्यत्वं विदन्ति।

असंयमप्रभवं हि दुःखम्। नैतदज्ञानां

दुःखप्रतिघातः।

## (८) कृतवादिमतम्

प्राक् शुद्धोऽपापक आत्मा क्रीडाप्रद्वेषाभ्यां कर्म बद्ध्वा संसारेऽवतरति, ततोऽपि मुनिर्भूत्वाऽपापको भवति। यथा निरजस्कं जलं वातोद्धुतरेणुयुततया सरजस्कं भवतीति।

एतदप्यसारम्, मुक्तानां रागाद्ययोगात्। अतस्ते तीर्थिका असंवृततया पुनः पुनः भवाटवीमटिष्यन्ति। उत्पत्स्यन्ते च प्रभूतकालमसुरकिल्बिषिकतया।

## ॥१-१-४॥

सावद्योपदेशका रागादिजिताः पण्डित-मानिनो बाला न शरणम्। अतस्ते-ष्वसक्तोऽनुत्कर्षोऽप्रलीनश्च मुनिर्माध्य-स्थ्येन वर्तेत। परिग्रहारम्भवर्जितांश्च शरणतया प्रपद्येत। उद्गमादिसर्वदोषान् परित्यज्य रागादिरहितश्चरेत्। त्यजेच्च तपआदिमदम्।

केचिदेकान्तनित्यत्वं केचित्त्वेकान्ता-नित्यत्वं लोकस्य प्रतिपन्नाः। केचित्तु सार्वज्ञ्यप्रतिषेधिनः। लोकनित्यत्वे

त्रसादिभावपरावर्त्तानुपपत्तिः। अपि चौदारिकशरीरावस्थाविपर्यासः प्रत्यक्षमीक्ष्यते। किञ्चाप्रियदुःखाः सर्वेऽप्यतोऽहिंस्याः। अहिंसैव ज्ञानसारः। जानीयादात्मसमतां सर्वजीवानाम्। यावज्जीवं चर्यादावुपयोगवता भाव्यम्। रक्ष्यं ज्ञानादि। विवेचनीयं क्रोधादि। साधुः सदा समितः पञ्चसंवरसंवृतः गृहिष्वप्रतिबद्धः परिव्रजेत् सर्वकर्मक्षयाय।

# वैतालीयम्

## ॥१-२-१॥

सम्बुध्यध्वम्, प्रेत्य बोधेर्दुर्लभत्वात्। न हि प्रत्यावर्त्ततेऽतिक्रान्तः कालः। दुर्लभं च पुनः संयमजीवितम्। बाला वृद्धा गर्भस्था अपि म्रियन्ते मानवाः। यथा श्येनो वर्त्तकं हरेत्, एवमायुःक्षये त्रुट्यति जीवितम्।

कश्चिन्मातापित्रादिभिः संसारे भ्राम्यति, नास्य प्रेत्य सुगतिरपि सुलभा। एतानि प्रेक्ष्य सुव्रतो विरमेताऽऽरम्भात्।

स्वकृतकर्मभिर्भ्राम्यन्ते जीवाः, अवगाहन्ते च नरकादिस्थानानि, न तद्विपाकास्पृष्टस्य मोक्षः, अन्यत्र तपसः। देवादयः पश्वन्ताः सर्वेऽपि दुःखिताः सन्तस्त्यजन्ति स्वस्थानानि।

बहुश्रुतत्वादियुता अपि मायाकृतासदनुष्ठानैर्मूर्च्छिताः कर्मभिस्तीव्रं छिद्यन्ते। यस्तु प्रव्रज्यापि मोक्षोपायं भाषत एव, न पुनर्विधत्ते। तदनुयायी त्वमपि कथं मोक्षोपायं तद्विपक्षं च ज्ञास्यसि? एवम्भूतस्त्वन्तरैव कर्मभिः

पीड्यते। यद्यपि नग्नः कृशश्च चरेत्, मासान्ते च सकृद् भुञ्जीत, तथापि य इह मायादिभिः पूर्यते, सोऽनन्तशो गर्भाद् गर्भं यास्यति।

उपरमातः पापात्। सान्तमेव मनुज-जीवनम्। मोहं यान्ति कामगृद्धा भोगस्नेहपङ्कमग्नाः। सूक्ष्मजीवाभि-व्याप्ताः पन्थानः, अतो यतमानः संयमयोगयुतो विहर। अर्हद्भिः सम्यक् प्रवेदितं यत् सूत्रानुसारेणैव संयमं प्रति प्रक्रामेत्।

नाहमेवैकः पीड्ये, अपि त्वन्येऽपि जीवाः, न तु तेषां निर्जराफलम्, सद्विवेकविरहात्। एवं ज्ञानादियुतः पृथग्जनादधिकं पश्यन् परीषहैः स्पृष्टोऽध्यासीतः। यथा लकुटादिप्रहारैर्भित्तेः कार्श्यं भवति, तथानशनादिभिः कृशीकुरु देहम्। पांशुगुण्डिता शकुनिकेव तपोयुतः संयमी कर्म विधूय क्षपयति। न च स्वजनादिप्रार्थनया तद्वशीभवत्यनगारः, तद्रुदनादेरपि तदुत्प्रव्राजनाप्रत्यलत्वात्, आस्तां कामप्रलोभनादेः।

कर्मविदारकमार्गमागतः सन् मनोवाक्कायैः संवृतो वित्तं ज्ञातीनारम्भं च त्यक्त्वा सुसंवृतश्चरेत्।

॥१-२-२॥

निष्कषायता कर्मक्षयहेतुरिति ज्ञात्वा न माद्यति मुनिः। अश्रेयस्करीति न निन्दामपि कुरुते। दीर्घभवभ्रान्तिहेतुः परपरिभवः। चक्री वा प्रेष्यप्रेष्यो वाऽपि प्रव्रजितो न वन्दनादौ लज्जेत, अपि तु सदा समतां चरेत्। यावज्जीवं लज्जामदपरित्यागं कृत्वा प्रवर्त्तितव्यं संयमानुष्ठाने। शक्यमेतदपि

मोक्षादिपर्यालोचनेन। पटुप्रज्ञो जयेत् कषायादि समतयोदाहरेद् धर्मम्। न हन्यमानः क्रुध्येत्, न वा पूज्यमानो मानी स्यात्।

धनस्वजनादिकमिहलोके परलोके च दुःखावहं नश्वरं चेति जानन् को गृहमावसेत्? विघ्नं सूक्ष्मं दुरुद्धरं शल्यं च वन्दनपूजनादिकम्, अतो विद्वान् परिचयं त्यजेत्। स्थानादौ सर्वत्र रागादिरहिततयैकश्चरेत्। शून्य-गृहद्वारपिधानोद्घाटने वर्जयेत्। पृष्टस्सन् न सावद्यं भाषेत। नाप्याभिग्रहिक-

स्तृणाद्यपनयेत् संस्तरेद्वा। स च यत्र सूर्योऽस्तमितस्तत्र समविषम-शयनासनादीन्यध्यासीत। सहेत च दंशादिपरीषहान् दिव्याद्युपसर्गांश्च, यथा रोमोद्गमोऽपि न स्यात्। जीविताशात्यागात् पूजनाद्यनभिला-षाच्च भैरवा अप्युपसर्गाः सुसहाः स्युः। परीषहादौ निर्भयस्य सामायिकमाहुः। अयुक्तो राजसंसर्गः, असमाधिहेतुत्वात्। कलहः परुषवचनं च संयमप्रध्वंसकृत्। तस्य सामायिकं यो गृहिभाजने न भुङ्क्ते। न मदः कार्यः, आयुषोऽसंस्कार्यत्वात्।

अनुत्तरोऽयं धर्मः अतोऽयमेव ग्राह्यः, अवन्ध्यनिबन्धनत्वान्मुक्तेः। शब्दादि-विषयसेवनविरता जिनानुयायिनः। धर्मसमुत्थिता सारयन्त्यन्यं धर्मतो भ्रश्यन्तम्। काथिकत्वं प्राश्निकत्वं सम्प्रसारकत्वं मामकत्वं चानुत्तरं धर्मं ज्ञात्वा संयमं चरेत्। त्यक्त्वा कषा-यान् ज्ञानादियुतो धर्मार्थी तपोवी-र्यवान् समाहितेन्द्रियो विहरेत्, दुर्लभ-त्वादात्महितस्य। एवं महान्तमिदमवसरं मत्वा गुरूक्तमार्गानुयायिनस्तीर्णा अपारसंसारसागरम्।

## ॥१-२-३॥

अज्ञानबद्धं कर्म क्षीयते संयमेन। ततो मरणादिमुक्ता मोक्षं व्रजन्ति पण्डिताः। कामान् रोगवत् पश्यन्तः स्त्रीपरित्यागादुपयान्ति मोक्षम्। रत्नादिकल्पानि महाव्रतानि, पात्रं तु तस्य राजस्थानीयः साधुरेव। सुखशीलाः कामसक्ताश्च न जानन्ति समाधिम्। पीडितदुर्बलबलीवर्दवत् कामाभिलाषी सीदत्यन्तरैव, न तु गन्तुं शक्नोति मोक्षमार्गे। मा पश्चादसाधुता भवेत्। अतोऽत्येहि

कामाभिष्वङ्गम्। आत्मानमनुशाधि यथाऽसाधुदुर्गतावधिकं शोचति परि-देवति च। एकान्तहिंसका नरकादिगतिं गत्वा निवसन्ति तत्र प्रभूतं कालम्। बालतपसा देवत्वं प्राप्ता अपि भवन्ति किल्बिषिकाः। परिहरेत् श्लाघां पूजनं च। आत्मवञ्चका जराद्यभिद्रुता भ्राम्यन्ति भवम्। सर्वजिनोक्तिरियम्-त्रिविधेनापि मा हन्याज्जीवान्। भवेदा-त्महितोऽनिदानः संवृतश्च। एवमनन्ताः सिद्धाः। सिध्यन्ति सम्प्रति। सेत्स्यन्ति चापरेऽनागतकाले।

# उपसर्गः

## ।।१-३-१।।

यावत्सङ्ग्रामे जेतारं न पश्यति कातरः, तावदात्मानं शूरं मन्यते। एवं शैक्षोऽपि परीषहैरस्पृष्टः सन् शूरं मन्यत आत्मानम्। यदा हेमन्ते सहिमकणवातं शीतं स्पृशति तदा राज्यहीनक्षत्रियवद् विषीदतेऽसौ, ग्रीष्मे चाल्पोदकमत्स्यवत्। दुःखेन प्रतिषिध्यते क्षुधादिवेदनार्त्तैरनेषणीयम्। आक्रोशाद्यसहिष्णवस्तथा विषीदन्ति, यथा सङ्ग्रामे भीरवः। श्वादिदशनेऽपि

दह्यमाना इव सङ्कोचयन्ति गात्रम्। दुर्भगा नग्नाः परपिण्डप्रार्थका अधमा मुण्डा विकृताङ्गा उपचिततनुमला अशोभनाश्चैत इत्यनार्या अवजानन्ति साधुम्, गच्छन्ति ते तमसस्तमः, मोहावृतत्वात्।

देशादिपरीषहासहिष्णवश्चिन्तयन्ति, न परलोको दृष्टो मया, शङ्क एत-त्सहनफलं मरणमात्रम्-इति। ते च केशलोचेन सन्तप्ता ब्रह्मचर्येण पराजिताश्च शीतलविहारिणो भूत्वा भ्रश्यन्ति संयमात्, यथा मत्स्यबन्धने

प्रविष्टा मत्स्या जीविताद् भ्रश्यन्ति। हननबन्धनादिना कदर्थितो बालो ज्ञातीनां स्मरति, यथा क्रोधेन गृहवर्जनं कृतवती नारी सर्वाभिद्रुता ज्ञातीनां स्मरति। दुरध्यासा एते सर्वेऽपि परुषस्पर्शाः, येभ्योऽवशाः क्लीबा गृहं गताः, शरशताकुलहस्तिवत्।

॥१-३-२॥

अथ सूक्ष्माः सङ्गाः, ये भिक्षूणामपि दुरुत्तराः। यत्र विषीदन्त्येके संयमयापनाशक्ताः। यथा वेष्टयित्वा रुदन्ति

ज्ञातयः, प्रार्थयन्ति च स्वपोषणार्थम्। ज्ञापयन्ति पितृप्रभृतेर्वार्द्धक्यादिपीडाः। प्रमाणयन्ति मातापितृपोषणं पुण्यतया। स्मारयन्ति मधुरवादिक्षुल्लकपुत्राणां नववध्वाश्च, मा भूत्तस्या अन्यग-मनमिति। आमन्त्रयन्ति गृहप्रत्याग-मनार्थम्। मोहयन्ति यथा नैवम-श्रमणत्वम्, पश्चाद्वार्द्धक्ये वा परिव्रजेति। लोभयन्ति स्वर्णादिभिः। एवं दीनज्ञातिव्युद्ग्राहितस्तत्सङ्गबद्धो धावत्यगारं प्रति।

प्रतिबध्नन्त्यसमाधिना ज्ञातयः। परि-
हरेत्तत्सङ्गमपि भिक्षुः, सर्वसङ्गानां
महाश्रवत्वात्। अनुत्तरं धर्मं श्रुत्वा
नासंयमजीवितमभिकाङ्क्षेत्।

अथेमेऽप्यावर्त्ताः, यतोऽपसर्पन्ति बुद्धाः,
सीदन्ति त्वबुधाः। राजादयो भोगैर्निम-
न्त्रयन्ति, यथा हस्त्यादयो वस्त्रादयः
स्त्र्यादयश्चेतीमान् भोगान् भुङ्क्ष्व।
तत्रोन्नतभागमार्गे दुर्बलबलीवर्दवद्वि-
षीदन्ति मन्दाः, यान्ति च गृहवासम्।

## ।।१-३-३।।

पराजयशङ्किनस्कातराः सङ्ग्राम-
काले प्रागेव गहनादि प्रेक्षत आत्म-
निगूहनार्थम्, एवं श्रमणा अप्यात्मानं
संयमवहनार्थमबलं ज्ञात्वाऽऽजीविका-
भयमपाकर्त्तुं पठन्ति ज्योतिष्कादि।
भिक्षुणा तु शूरवदगारबन्धनं त्यक्त्वा
कर्मक्षयार्थं यतितव्यम्।

भिक्षुनिन्दनपरा आजीविकादयः समा-
धितो दूरे वर्त्तन्ते। वदन्ति ते भिक्षून्, सरागा
यूयम्, मिथो मूर्च्छिताश्च, ग्लानहेतोर्भ-

क्ताद्यन्वेषणप्रवृत्तत्वात्, एवञ्च न यूयं संसारपारगाः, सत्पथसद्भावभ्रष्टत्वात्। प्रतिभाषेत तान् भिक्षुः, यथा यूयं गृहियतिद्विपक्षसेवकाः, गृहिपात्रेषु भोजनक्रियया पूर्वकर्मपश्चात्कर्मदोषानुषङ्गात्, ग्लानानामभ्याहृतदोषसेवनाच्च। अपि चाधाकर्मादिदोषोऽप्यापाद्यते गृहिभिः।

किञ्च तीव्रामर्षलिप्ता विवेकहीना असमाहिताश्च यूयम्। संयमोपकरणपरिहारेणासंयमसेवनध्रौव्यात्। न

ह्यतिकण्डूयितं श्रेय इति स्मर्त्तव्यो न्यायः। न चासंयतैरेव ग्लानोपचरणं कार्यम्, न तु संयतैरिति वदन्ति जिनाः।

एवमुक्ता अपि ते रागाद्यभिभूता मिथ्यात्वाभिद्रुताश्चाक्रोशान् शरणं यान्ति। तत्रात्मसमाधिकः साधुः सद्धेत्वादिकमुपन्यस्याविरुद्धं समाचरेत्। काश्यपोक्तमिमं धर्ममादायाग्लानतया यथासमाधि ग्लानस्य वैयावृत्यं कुर्यात्।

॥१-३-४॥

वल्कलचीर्यादयो महापुरुषाः शीतो–

दकादिपरिभोगेन सिद्धिमापन्ना इत्याकर्ण्य विषीदति मन्दः। किञ्च सुखात् सुखलाभः, न लोचादिकष्टेनेत्याहुः केचित्। ते चाल्पेन वैषयिकसुखेन विध्वंसयति बहु मोक्षसुखम्, अतो नावमान्या जिनाज्ञा।

हिंसादिप्रवृत्ता जिनशासनपराङ्मुखाः स्त्रीवशा बाला प्रज्ञापयन्ति यथा न स्त्रीभोगे दोषः, गण्डनिष्पीडनेन पूयरुधिरादिनिर्गालनसमत्वात्, मेषादेरुदकपानतुल्यत्वाच्च तस्य।

ते च कामसक्ततया न पश्यन्त्यनागतम्, गवेषयन्ति प्रत्युत्पन्नमात्रम्, ततोऽप्यायुषि यौवने वा क्षीणे परितप्यन्ते। उचितकाले कृतपराक्रमास्तु बन्धनोन्मुक्ता असंयमजीवितनिःस्पृहा न पश्चात् परितप्यन्ते।

वैतरणीव दुस्तरा निर्विवेकानां नारी। तत्संयोगादिपराङ्मुखा एवैतानुपसर्गान् निराकृत्य तिष्ठन्ति सुसमाधिना तरिष्यन्ति च ते संसारसागरम्।

# स्त्रीपरिज्ञा

## ॥१-४-१॥

वन्दनादिव्याजेन निर्विवेकाः स्त्रियः प्रतारणप्रवणा भ्रंशयन्ति भिक्षुं संयमात्। अत्यन्तं पार्श्वे ते निषीदन्ति। कामपोषकं परिदधति वस्त्रम्, दर्शयन्त्यङ्गप्रत्यङ्गानि। निमन्त्रयन्त्यासनादिभिः।

न तासु सन्दध्याच्चक्षुः। नाकार्यकरणं समनुजानीयात्। नापि ताभिः सार्धं विहरेत्। एवमेवात्मसुरक्षासम्भवात्।

सङ्केतं ग्राहयित्वा पातयित्वा च विश्रम्भे युष्मदीयमेवेदं शरीरमित्यादिवचसा प्रलोभ्य भिन्नकथाभिः स्ववशं ज्ञात्वाऽऽज्ञापयन्ति संवृतमप्यनगारम्। ततोऽपि मांसादिप्रलोभनेन सिंह इव तद्वशीभवति साधुः। ततः प्रवर्त्त-यन्ति तं स्वकार्यानुकूल्ये। न च तत्पाशान्मुच्यते साधुः, पाशबद्धमृ-गवत्। स पश्चादनुतप्यते, यथा विषमिश्रं पायसं भुक्त्वा। अतो विवेकमादाय न स्त्रीसंवासः सेव्यः, ततः सदनु-ष्ठानविघातध्रौव्यात्। विषलिप्तकण्ट-

कवत्त्याज्या स्त्री। वर्ज्या च गृहिकुलेषु धर्मकथाऽपि, तां वदतोऽपि श्रामण्या-पगमात्, कुशीलान्यतरत्वापत्तेः। सुत-पस्व्यपि भिक्षुर्न विहरेत् स्त्रीभिः सह। न दुहित्रादिभिरपि संस्तवं कुर्यात्।

अपि च स्त्रीसङ्गत्या गृहीणां प्रकोपः स्त्रीदोषशङ्का च। साधोरपि समा-धियोगप्रभ्रंशः। अत आत्महिताय त्याज्या स्त्रीवसतीः। तदत्यागिनां गृहियतिमिश्रीभावप्राप्तानां कुशीलानां मोक्षमार्गप्ररूपणं वाचावीर्यमेव। ते

पर्षदि शुद्धं गर्जन्ति, दुष्कृतं तु कुर्वते रहसि, जानन्ति तु तं तज्ज्ञा महाशठतया। अपलपन्ति ते स्वाकार्यम्। कुर्वत आत्मश्लाघाम्। ग्लानतामुपयान्ति चोद्यमानाः। भुक्तभोगिनोऽपि वशतां गच्छन्ति स्त्रीणाम्। स्त्रीसम्पर्केण हस्तादिच्छेदनादिकं दुःषहं दण्डं प्राप्ता अपि न ब्रुवते, यथा–नैतत् पुनः करिष्याम इति।

किञ्च मैवं कार्षीरित्यादि प्रोक्ता न भूयः करिष्य इत्यभ्युपगम्यापि पुनः स्त्री तथा कुरुते। दुर्विज्ञेया प्रमदा इत्युक्तं

स्त्रीशास्त्रेष्वपि। स्त्रीणां मनोवाक्का-
यविसंवादो भवतीत्यश्रद्धेयास्ताः, बहु-
मायत्वात्।

संयमार्थिव्याजेन श्राविकाव्याजेन वा
नेदीयसी भूत्वा भ्रंशयन्ति ताः साधुम्।
लाक्षाघटो यथाऽग्नेः समीपे विलीयते
तथा विद्वानपि स्त्रीसंवासे। पापं कृत्वापि
दुहितृतुल्येयं ममेत्यपलपतोऽज्ञस्य
द्वितीयेयं बालता द्विगुणपापोपलेपश्च।

कूटपाशकल्पं स्त्रीनिमन्त्रणमिति ज्ञात्वा
नेच्छेत् तद्गृहगमनम्, शब्दादिपाशव-

शीकारहेतुत्वात् मोहमौढ्यबीजत्वाच्च तस्य।

॥१-४-२॥

न रज्येत स्त्रीषु। रक्तोऽपि विरज्येत ज्ञानाङ्कुशेन, अन्यथा विडम्बनाध्रौव्यात्। तथाहि संयमभेदमापन्नं कामाभिलाषिणं भिक्षुं स्ववशगं ज्ञात्वा कोपं प्रादुष्कृत्य पादयोः पातयित्वा पादमुद्धृत्य प्रहन्ति मूर्ध्नि। चाटूक्त्या तं वशीकृत्य योजयति प्रेष्यकर्मसु, यथाऽऽहर शोभनफलादीनि। रञ्जय मे पादौ। उन्मर्दय मदङ्गम्। आनय प्रद्योतार्थं

काष्ठानि। देहि मे वीणादिवाजिन्त्राणि गन्धद्रव्याणि प्रसाधनादीनि विभूषणानि च। प्रस्रवणार्थं शूर्प्पादि चाऽऽनयेति।

अपि च स्त्रीवशाः पुत्रपोषिण उष्ट्रा इव भारवहा भवन्ति। रजका इव वस्त्र-धावकाश्च। दासा इवादिश्यन्ते स्त्रिया। मृगा इव ध्रियन्ते परवशाः। प्रेष्या इव नियोज्यते वर्चःशोधनादावपि। अव-ज्ञायन्ते च पशव इव। अतस्त्रिविधं त्यजेत् परक्रियाम्। न स्त्रीस्पर्शवशगस्स्यात्। श्रीवीर आह भिक्षुरध्यात्मविशुद्धः सुविमुक्तस्सन् परिव्रजेदा मोक्षाय।

# नरकविभक्तिः

## ।।१-५-१।।

पृष्टवानहं श्रीवीरं क्व नरकाः? कश्च तद्गतिहेतुः? इति। स आह–असंयमेच्छुतया कृतहिंसादिपापाः पतन्ति तीव्रभितापे घोररूपे तमिस्रान्धकारे नरके। तत्र हत छिन्त भिन्त दहतेति परमाधार्मिकाणां शब्दान् श्रुत्वा भयेन नष्टचेतना नारकास्त्राणं काङ्क्षन्ति, यथा कां दिशं व्रजाम इति। नष्टानामपि तेषामङ्गारोपमभूमिमनुक्रमतां दाहः,

दुस्तरवैतरणीविडम्बनाः, सायकाद्यभिवेधः, स्मृतिभ्रंशकृत्तीक्ष्णव्यथा, सशिलं जलनिमज्जनम्, मुर्मुराग्नौ कलम्बुवालुकायां भर्जनम्, दुर्मोक्षज्वलनगुहायां दाहः, सजीवमत्स्यानामग्निसमीपानामिव दारुणपीडा च।

अपि च कुठारादिकृतसन्तक्षणम्, अयःकवल्ल्यां स्वरुधिरे परिपचनम्, तप्ततैलाग्नितापम्, नरकपालविहितभीमविडम्बनां चानुभवतां नारकाणां न विद्यते दुःखोपमानम्। विष्टादिपूर्णे

महाभितापे नरके पतिताः कुर्वन्त्य-
शुचिभक्षणम्। नरकपालविकुर्वितैश्च
खाद्यन्ते कृमिभिः। उष्णस्थानेषु बहुदुः-
खदेषु निगडेषु देहं वितत्य क्षिपन्ति
परमाधार्मिकाः। कीलयन्ति तच्छीर्षं
कीलकैः। नासिकौष्ठजिह्वादिकं च
छिन्दन्ति।

रात्रिन्दिवमप्याक्रन्दन्ति ते नारकाः।
क्षारप्रदिग्धाङ्गा गलन्ति ते शोणि-
तपूयमांसम्। क्षिप्यन्ते ते लोहितपू-
यपूर्णासु कुम्भीसु। रसन्ति ते करु-

णमार्त्तस्वरम्। तप्तत्रपुताम्रं पाय्यमानास्तु रसन्त्यार्त्ततरम्।

आत्मनाऽऽत्मानं वञ्चयित्वा बहुक्रूर-कर्म्माणस्तत्र पूर्वशतानि यावत् त्रयस्त्रिंशत् सागरोपमाण्यपि तिष्ठन्ति। यथा कर्म तथा वेदना।

॥१-५-२॥

नरकपालान् तान् हस्तेषु पादेषु च बद्ध्वा क्षुरप्रासिभिः विकर्त्तयन्त्युदरम्। उद्धरन्ति च पृष्ठचर्म। विदार्य मुखं तप्तायोगोलकादिकं प्रक्षिप्य दहन्ति

समन्तात्। रथे योजयित्वा वाहयन्ति, स्मारयन्ति च पूर्वदुष्कृतानि। प्रज्व-लितलोहपथमिव तप्तां रुधिरपूयादिना प्रपिच्छलां भूमिं बलादनुक्रम्यमाणा नारका रसन्त्यतिविरसम्। हन्यन्त एते निपातिनिभिः शिलाभिः।

किञ्च कन्दुषु प्रक्षिप्तास्ते भृज्यमानाश्चनका इवोर्ध्वमुत्पतन्ति, तदोर्ध्वं खाद्यन्ते ते वैक्रियैः काकैः, पतिताश्चाधः सिंहादिभिः। समुच्छ्रिते यातनास्थानेऽधः शिरः कृत्वा विकर्त्त्यायोवच्छस्त्रैः खण्डशः खण्डयन्ति।

स्तम्भादौ लम्बिता उत्कृत्ताङ्गाश्च नारकाः खाद्यन्ते वज्रतुण्डैः पक्षिभिः। निहे = आघातस्थाने सदाऽकाष्ठाग्नि-र्ज्वलन् आस्ते, तत्र व्यक्ताक्रन्दध्वनयो नारकाश्चिरं तिष्ठन्ति। अत्युष्णस्थाने प्रक्षिप्य नारकान् बद्धवा च हस्तादीन् शत्रुमिव दण्डैस्ताडयन्ति नरकपालाः। लकुटादिप्रहारैर्भञ्जयन्ति पृष्ठाद्यङ्गानि। प्रेरयन्ति तप्ताभिराराभिः। योजयन्ति हस्तितुल्यभारवहने। विध्यन्ति च मर्माणि। कुट्टयित्वा खण्डयित्वा तान् बलिमिवेतश्चेतश्च क्षिपन्ति। वैक्रियं

पर्वतमारोढुं प्रेर्यमाणा हन्यन्ते सहस्राणामपि मुहूर्त्तानां परम्।

समुद्गराणि मुसलानि गृहीत्वा भञ्जन्त्यङ्गानि सरोषम्। ते भिन्नदेहा रुधिरं वमन्तोऽधोमुखाः पतन्ति धरणितले। किञ्च तत्र बुभुक्षिता घृष्टा नित्यकुपिता महाशृगालाः समीपे सन्ति, यैः शृङ्खलिकादिभिर्बद्धाः खाद्यन्ते नारकाः।

सदाजलायां नद्यां प्लवन्ते नारकाः, या रुधिरादिना प्रपिच्छला, तप्तविलीन-

लोहसदृशजला च। न हन्यमानस्य नारकस्य कोऽपि त्राणम्, अपि तु स एकः स्वयमेव प्रत्यनुभवति दुःखम्। प्राग्भव एकान्तदुःखं भवमर्जयित्वा दुःखिनो जीवा वेदयन्त्येवमनन्तदुःखम्।

एवं नरकदुःखं श्रुत्वा धीरः परित्यज्य हिंसादि स्वकर्मफलभोक्तारं बुध्येत लोकम्। सद्दृष्टिर्भूयात्। न विषयादेर्वशं गच्छेत्। एवं तिर्यगादिष्वपि चतुर्गति-कमनन्तं दुःखं विदित्वा यावज्जीवं संयममाचरेत्, एतद्दुःखमोक्षोपायान्त-रविरहात्।

# महावीरस्तवः

## ।।१-६।।

पृष्टवन्तः श्रमणादयः श्रीसुधर्मस्वामिनम्, यथा क आहेममेकान्तहितमतुल्यं धर्मम्? किंस्वरूपं चाऽऽसीत् तज्ज्ञानादि? अत्र स आह–आत्मस्वरूपज्ञः कुशल आशुप्रज्ञ आहैनं धर्मं ज्ञातपुत्रश्रीवीरः। योऽनन्तज्ञान्यनन्तदर्शी च। तस्य धर्मं संयमधृतिं च जानीहि।

नित्यानित्या जीवा इति समीक्ष्य स दीप इवोक्तवान् सम्यग्धर्मम्। स

शुद्धचर्यावानात्मस्वरूपस्थितः सर्वजगत्यनुत्तरो विद्वान् ग्रन्थातीतोऽभयोऽनायुश्च। स वर्द्धमानप्रज्ञ ओघन्तरो धीरोऽनन्तचक्षुश्च तपत्यनुत्तरं सूर्यवत्। प्रकाशते चाग्निवत्।

काश्यपगोत्रीयोऽयं प्रज्ञयाऽक्षयः, अनन्तपारश्च, स्वयम्भूरमणवत्। अनाविलोऽकषायी मुक्तोऽयं द्योतते देवाधिपतिशक्र इव। प्रतिपूर्णवीर्योऽसौ सर्वनगश्रेष्ठमेरुरिव देवानां प्रमोदकरोऽनेकगुणोपपेतो विराजते। एवं

निषधादिपर्वतोपमाऽप्यस्य।

अनुत्तरमुपदिश्य धर्मं ध्यायत्यसावनुत्तरं ध्यानवरं शङ्खाद्युपमं शुक्लम्। ज्ञानदर्शनशीलैरशेषं कर्म विशोधयित्वा प्राप्तोऽसौ परमां सिद्धिगतिम्।

यथा वृक्षेषु शाल्मलिः, वनेषु नन्दनम्, शब्देषु स्तनितम्, तारकेषु चन्द्रः, गन्धेषु चन्दनम्, समुद्रेषु स्वयम्भूरमणः, नागेषु धरणेन्द्रः, रसेष्विक्षुरसोदकः, हस्ति-ष्वैरावतः, मृगेषु सिंहः, नदीषु गङ्गा, पक्षिषु गरुडः, योधेषु चक्री, पुष्पेषु

पद्मम्, क्षत्रियेषु चक्री, दानेष्वभयम्, सत्येष्वनवद्यम्, तपस्सूत्तमब्रह्मचर्यम्, स्थितिमतां लवसप्तमाः, सभासु च सुधर्मा एवमेव श्रीवीरोऽपि स्वकीयैरनुत्तरैर्ज्ञानादिभिः श्रेष्ठः, न च ततोऽपि परोऽस्ति कश्चित् ज्ञानी।

क्रोधादिदोषान् वान्त्वाऽसावर्हन् त्यजति कृतादिभिः पापम्। क्रिया-ऽक्रिया-ऽज्ञान-विनयवादिनां बौद्धादीनां च दर्शनं दुर्गतिहेतुतया प्रतीत्य प्रज्ञाप्य च यावज्जीवमुपस्थितः संयमम्।

स स्त्री–रात्रिभोजनाद्यानाश्रवान् वार–यित्वा दुःखक्षयार्थं तपोनिष्टप्तदेह इह–लोकं परलोकं च ज्ञात्वा सर्वपापस्थानं निवारितवान् बहुशः। श्रुत्वा तदुक्तं धर्मं श्रद्धयाऽनुष्ठितवन्तो बहवो जनाः सिद्धाः। अपर इन्द्रत्वादिपदमापुः। तेऽपि सेत्स्यन्त्यनागतकाले।

# कुशीलपरिभाषा

## ॥१-७॥

ये पृथ्व्यादिजीवान् समारभन्ते, ते तेष्वेव पुनः पुनरुत्पद्यन्ते। यत इहलोके पर-लोके वा जघन्यतो दशगुणमन्यथाऽ-नन्तगुणमपि वेद्यते दुःखं हिंसाकृता। प्रव्रज्यापि य आत्मसुखार्थं समारभन्तेऽ-ग्निजीवांस्ते कुशीलधर्माणः। सम्भवति षट्कायविनाशोऽग्न्यारम्भेऽतो वर्ज्यः सः।

येऽपि छिन्दन्ति स्वसुखार्थं हरितादीनि ते निर्घृणा बहुजीवातिपातिनोऽनार्य-

धर्माणः। ते व्यक्तवाचोऽव्यक्तवाचश्च म्रियन्ते गर्भादिकासु विविधास्ववस्थासु।

केचिल्लवणवर्जनेनापरे शीतोदकसेवनेनाऽन्ये तु हुतेन मोक्षं वदन्ति। किन्तु नैतत्सत्यम्। अपि तु मद्यादिप्रवृत्तानां तेषां कुतीर्थिकानां संसारवास एव। किञ्चोदकस्पर्शस्य मोक्षहेतुत्वे मत्स्यादीनामपि तत्प्रसङ्गः। अपि चोदकेन यदि पापप्रक्षालनम्, तदा पुण्यापगमोऽप्यस्तु, तुल्यन्यायात्, नो चेत्, पापापहारोऽपि मा भूत्, तत एव।

नाग्निस्पर्शोऽपि मोक्षदः कुम्भकारादेरपि

तत्प्रसक्तेः। अतो विवेकमादाय द्रष्टव्यं यथा प्रियसुखा जीवाः न तेषां दुःखोत्पादनेन सुखावाप्तिरिति।

भीमं दुःखं नरके सपापानाम्, अतो निवर्त्त्यं विदुषा हिंसातः।

यो निर्दोषमपि सन्निधिं कृत्वा भुङ्क्ते, यः प्रासुकजलेनापि गात्राणि सङ्कोच्य स्नाति, यो विभूषार्थं वस्त्रे धावनादिसंस्कारं कुरुते, यश्च स्वादुकानि कुलानि धावति, दूरे स श्रामण्यस्य वर्त्तते। योऽपि परभोजने दीनतया चाटुकारी, स नीवारगृद्धमहावराह

इव शीघ्रमेवैष्यति घातम्। अतोऽधि-सहेताज्ञातपिण्डेन, न तपसा पूजनमा-वहेत्। सर्वकामगृद्धिमपनयेत्। धीरः सर्वसङ्गानतीत्य सर्वदुःखानि तितिक्ष-माणो ज्ञानादिपूर्णः कामेष्वगृद्धोऽप्रति-बद्धविहार्यभयङ्करोऽनाकुलस्वभावो विहरेत्। संयमनिर्वाहार्थं मुनिर्भुञ्जीत। काङ्क्षेत पापविवेकम्। दुःखस्पृष्टोऽपि संयममाददीत। सङ्ग्रामशिरसि शूर इव दमयेत्कर्मशत्रुम्। हन्यमानोऽपि फलकवदरक्तद्विष्टो मुनिः काङ्क्षतीव मृत्युसमागमम्। एवं कर्म निर्धूय न पुनरुपैति संसारम्।

# वीर्यम्

## ॥१-८॥

किं वीरस्य वीरत्वम्? केन वीर इत्युच्यते? द्विधा वीर्यम्–कर्मवीर्यमकर्मवीर्यं च। प्रमादः कर्म। अप्रमादोऽकर्म। एवञ्चेदं बालवीर्यं पण्डितवीर्यं च। त्रिविधं त्रिविधेनात्मसुखार्थं हिंसाप्रवृत्तानां वैरानुरागिणां पापारम्भकाणां रागाद्या–श्रितानां बालानां सकर्मवीर्यम्। सर्व–तश्छिन्नबन्धनानां पापघ्नानां स्वाख्या–तधर्मोद्यमिनां पण्डितानामकर्मवीर्यम्।

पर्यटति नरकादिषु बालवीर्यवान्। देवादयः स्वमत्या श्रुत्वा वा धर्मसारं ज्ञात्वा सर्वेऽप्यवश्यं त्यक्ष्यन्ति स्वस्थानानि। अनित्यो ज्ञात्यादिसंवासः। अतोऽपनीय गृद्धिमुपसम्पद्येतार्यं धर्मम्। स्वमत्या श्रुत्वा वा धर्मसारं ज्ञात्वा समुपस्थितोऽनगारः प्रत्याख्यातपापको भवति। आयुक्षेमस्योपक्रमं ज्ञात्वा तदन्तराले क्षिप्रं संलेखनां भक्तपरिज्ञादि च कुर्यात्।

यथा कूर्मः स्वके देहे स्वाङ्गानि समाहरेत्, एवं मेधावी पापान्यध्यात्मना

समाहरेत्। मनोवाक्कायानां सर्वे-न्द्रियाणां च पापेभ्यः संहरणं कुर्यात्।

लौकिकसुभटानां पराक्रान्तमशुद्धम्, कर्मबन्धफलत्वात्। इतरेषां शुद्धम्, मोक्षफलत्वात्। न पूजाद्यर्थं कृतं तपः शुद्धम्। अतो यथाऽन्ये न जानन्ति तथा तपः कर्त्तव्यम्। त्याज्या चात्मश्लाघा। भाव्यमल्पपिण्डाशिनाऽल्पभाषिणा च। एवं सुव्रतः क्षान्तो दान्तः शान्त आशंसारहितः सदा यतेत। ध्यानयोगं समाश्रित्य कायं सर्वशो व्युत्सृजेत्। तितिक्षा प्रधानेति ज्ञात्वाऽऽमोक्षाय परिव्रजेः।

# धर्मः

## ॥१-९॥

कीदृश आख्यातो धर्मः श्रीवीरेण? अत्राह–ऋजुर्जिनोक्तो धर्मः। आरम्भ–परिग्रहप्रवृत्तानां ब्राह्मणादीनां वैरवृद्धि–रेव, न दुःखमोक्षः। तन्मरणकृत्यं कृत्वा विषयैषिणः स्वजनादयस्तद्वित्तं हरन्ति। स तु स्वकर्मभिः कृत्यते। न तस्य त्राणाय मातापित्रादयः। अतः मोक्षहेतुं जिनोक्तधर्ममनुतिष्ठेत्।

पृथ्व्यादिकायषट्कं ज्ञात्वा मनोवा–

क्कायैस्तदारम्भपरिग्रहौ त्यजेत्। एवम-सत्यादीन् क्रोधादींश्च त्यजेत्। हस्त-पादवस्त्रादेर्धावनं तद्रञ्जनं बस्तिकर्म विरेचनं वमनमञ्जनं च संयमविघ्नमिति परिहरेत्। एवं गन्ध-माल्य-स्नान-दन्तप्रक्षालन-स्त्री-कर्मणामपि कर्त्तव्या परिज्ञा। परिजानीयाच्चौद्देशि-कक्रीतादीनि। वर्जयेद् गृहिसम्प्रसारणं तदारम्भप्रशंसां निमित्तकथनं मिथ्या-शास्त्रगतसंशयगोचरनिर्णयकथनं शय्यातरपिण्डग्रहणं च। नार्थशास्त्रं शिक्षेत द्यूतक्रीडां वा। नाधर्मवचो वदेत्।

वर्जयेच्च कलहविवादौ। परिजानीयाद् विद्वानुपानह्–छत्र–नालिका–वाल–व्यजनकानि परक्रियामन्योऽन्यक्रियां च।

न हरितेषूच्चारादि कुर्यात्। न प्रासुक–जलेनापि हरितादीन्यपनीयाऽऽचामेत्। न कदापि गृहिपात्रे भुञ्जीत। नाचेलोऽपि गृहिवस्त्रं भुञ्जीत। परिजानीयादासन्दी–पर्यङ्क–गृहनिषद्या–कुशलादिप्रश्न–पूर्वक्रीडास्मरणानि। परिजानीयाद्यशः कीर्त्तिं श्लोकं वन्दनं पूजनं कामांश्च। गृह्णीयात् संयमनिर्वाहयोग्यं कल्प्यम्।

अनुप्रदद्याच्च तद् अन्यसाधुभ्यः, न तु गृहिप्रभृतिभ्यः। एवं श्रुतचारित्रलक्षणं धर्ममुक्तवान् श्रीवीरः।

न रत्नाधिकस्य भाषमाणस्यान्तर्भाषणं कुर्यात्। नाप्यनुचितोल्लापं कुर्यात्। त्यजेन्मायाप्रधानं वचः। अनुचिन्त्य व्याकुर्यात्। सत्यासत्याऽपि न वक्तव्या भाषा। न सत्यमपि हिंसकं वाच्यम्। न रेकारपूर्वकमामन्त्रयेत्। त्यजेत् सखिवादं गोत्रवादं च। नापि त्वमिति भाषेत। त्याज्यममनोज्ञं वचः सर्वशः।

कुशीलसंसर्गे सातगौरवरूपाः प्रादुष्यन्त्युपसर्गाः। अतस्त्याज्यस्तत्संसर्गः। जराद्यन्तरायमन्तरेण न निषीदेद् गृहिगृहे। न हास्यकन्दर्पादिक्रीडां कुर्यात्। इष्टेषु शब्दादिष्वनुत्सुको यतमानः परिव्रजेत्। चर्यायामप्रमत्तोऽध्यासीतोपसर्गादीन्।

न हननाक्रोशाभ्यां कुप्येदपि तु सम्यक् सहेत। न च कोलाहलं कुर्यात्। न लब्धान् कामान् प्रार्थयेत्। एवं हि विवेकोदयः। शिक्षेताचार्यान्तिके ज्ञानादीनि।

सुप्रज्ञं सुतपस्विनं गुरुं शुश्रूषमाण उपासीत। वीरा ह्याप्तप्रज्ञान्वेषिणो धृतिमन्तो जितेन्द्रियाश्च। ते च गृहवासे श्रुतरूपं भावदीपमपश्यन्तः प्रव्रज्य पुनरसंयमं नेच्छन्ति। त्यजेत् सर्वमत्रोक्तं समयातीतम्, सन्धयेच्च निर्वाणम्।

# समाधिः

## ॥१-१०॥

शृणुत जिनोक्तं समाधिम्। निःस्पृहो भिक्षुः समाधिप्राप्तः परिव्रजेद् ज्ञानादिषु। परिहरेद्धिंसादीनि। न कुर्यात् कर्माश्रवम्। स्त्रीषु जितेन्द्रियः सर्वतो विप्रमुक्तश्चरेत्। दीनोऽपि पापं कुरुतेऽतः बुद्धस्तु समाधौ विवेके च रतो भवति। समतया सर्वमपि जगत् पश्यन्न कस्यचित् प्रियमप्रियं वा कुर्यात्।

दीनस्तूत्थायापि परीषहादिभिर्विषण्णो भवति। प्रार्थयति च पूजनादि। आधाकर्मादिनिकामचारी स्त्र्यादिसक्तो वैरानुगृद्धश्च कर्मनिचयं कृत्वा नरकादिषु याति। अतो मेधावी मुनिर्धर्मं समीक्ष्य सर्वतो विप्रमुक्तश्चरेत्। त्यक्त्वा शोकं विकृष्टतपसा शरीरापचयं कुर्यात्।

अभिप्रार्थयेदेकत्वमेव, ततो मोक्षला-भध्रौव्यात्। मैथुनपरिग्रहविरतो विषयेषु चारक्तद्विष्टो भिक्षुर्निःसंशयं समाधि-प्राप्तः।

निराकुर्याद्रत्यरती। अभिभवेच्छीतादि-स्पर्शम्। अधिसहेत दंशादिपरीषहं सुरभ्यादि च। वचोगुप्तः समाधिप्राप्तः शुद्धां लेश्यामुपादाय परिव्रजेत्। त्यजेत्प्रतिश्रयछादनं तत्कारणं च। न स्त्रीभिः सह संवसेत्। यथा क्षुद्रमृगा दूरेणैव सिंहं त्यजन्ति, एवं मेधाविना धर्मं समीक्ष्य दूरेणैव त्याज्यं पापम्। प्रव्रज्य जीवितमरणयोर्निःस्पृहश्छिन्ननिदानः कर्मबन्धनविप्रमुक्तश्चरेत्।

# मार्गः

## ॥१-११॥

को जिनोक्तो मार्गः, ऋजुना येन दुस्तरभवतरणम्? इत्यत्राह—वक्ष्ये तं मार्गं यं श्रुत्वाऽतार्षुस्तरन्ति तरिष्यन्ति च जीवाः। पृथ्व्यादिषु पृथक् पृथक् सत्त्वाः। न षट्कायेभ्योऽन्यो जीवराशिः। त्याज्या च सर्वजीवहिंसा। हिंसा—लाभान्तरायभयात् कूपखननादौ पुण्यभावाभावौ न वाच्यौ। तथाहि दानप्रशंसातो वधः, तत्प्रतिषेधतश्च

वृत्तिच्छेदः। अत उभयमपि भाषणं परित्यज्य मोक्षप्राप्तिसम्भवः। नक्षत्राणां चन्द्र इव निर्वाणमेव प्रधानमिति तदर्थं सकलाः क्रियाः कुर्यात्।

स्वकर्मपीड्यमानान् मिथ्यात्वादिस्रोत-उह्यमानान् साधुर्भावमार्गरूपमाख्याति द्वीपम्, यतस्तेषां मोक्षप्राप्तिः स्यात्, सा प्रतिष्ठोच्यते। य आत्मगुप्तः सदा दान्तश्छिन्नस्त्रोता अनाश्रवश्च, स प्रतिपूर्णं शुद्धमद्वितीयमाख्याति धर्मम्। तदज्ञा बुद्धमानिनोऽबुद्धाः समाधेर-

तिदूरे वर्तन्ते, उद्दिष्टादि भुक्त्वा पुनस्त-त्प्राप्त्यर्थमार्त्तध्यानध्यायित्वात्तेषाम्। ढङ्कादिकृतमत्स्यैषणाध्यानमिव कलुषितमधमं च तद्ध्यानम्। ते दुर्मतयो विराध्य शुद्धं मार्गमुन्मार्गं गता घातमेव स्वीयमन्वेषयन्ति।

अतो जिनोक्तमिमं धर्ममादाय तरेन् महाघोरं स्रोतः। परिव्रजेच्चात्मत्राणाय। यथा भूतानां जगती, तथाऽतीताना-गतजिनानां शान्तिः प्रतिष्ठानम्।

# समवसरणम्

## ।।१-१२।।

परमतवृन्दरूपाणि चत्वारि समवसरणानि– (१) क्रियावादिनः (२) अक्रियावादिनः (३) वैनयिकाः (४) अज्ञानिकाः।

कुशलमानिनोऽप्यज्ञानिका न तीर्णा विचिकित्साम्। असम्बद्धा अकोविदाश्च तेऽकोविदेभ्यः स्वशिष्येभ्योऽननुवि-चिन्त्य मृषां वदन्ति।

वैनयिका अपि सत्यमसत्यतया चिन्तयन्तः, असाधुं च साधुतया प्रतिपादयन्तो विनयमेव मोक्षोपायतया वदन्ति।

अक्रियावादिमत आत्माभावान्न क्रिया नापि तज्जः कर्मबन्धः। बौद्धमतेऽनागतादिक्षणैर्वर्तमान-क्षणस्यासङ्गतेर्न क्रिया नापि तज्जः कर्मबन्धः। येषां सर्वव्यापितयाऽक्रिय आत्मा, तेऽप्यक्रियावादिनः। किञ्च स्वाभ्युपगतनान्तरीयकतयाऽऽयातस्यार्थस्य स्ववाचैव

प्रतिषेधं कुर्वाणास्ते सम्मिश्रभावं कुर्वन्ति। एवञ्चाव्यक्तभाष्यननुवादिनस्ते भवन्ति। एवं पूर्वापरविरोधिवादिनोऽप्येकपक्षमिहैव जन्मनि वेद्यत्वादस्मद्दर्शनमिति वदन्तः षडायतनानि श्रोत्रादीन्याहुः, येभ्यः कर्माश्रवः।

अक्रियावादिनोऽबुध्यमाना विविधशास्त्राण्याहुः, यान्यादाय बहवो मनुष्या अनन्तं संसारं भ्रमन्ति। शून्यवादिनस्त्वादित्यादिकं सर्वमपलपन्तोऽर्थशून्यमाहुर्लोकम्। यथाऽन्धः सदीपोऽपि

न पश्यति, एवमक्रियावादिनः क्रियां न पश्यन्ति, निरुद्धप्रज्ञत्वात्।

बहवोऽष्टाङ्गनिमित्तान्यधीत्यानागतानि जानन्ति, न तच्छून्यवादादिषु घटते। ननु तेष्वपि तथ्यातथ्यदर्शनादज्ञानमेव श्रेय इति चेत्? न, सम्यगधीतस्य श्रुतस्याविसंवादित्वात्।

कैवल्येन विदितलोकाः स्वकृतं दुःखं नान्यकृतमिति ज्ञानक्रियाभ्यां मोक्ष इति चाहुः। ते तीर्थकरादयो यथार्थं हितं मार्गमनुशासन्ति।

दुस्तरभवसागरो दुर्मोक्षं च भवगहन-
मेवास्तिवादिनामपि, किम्पुनर्नास्ति-
कानाम्? विषयस्त्रीसक्ता यद्विषण्णा
रागद्वेषाभ्यां द्विधाऽप्यनुसञ्चरन्ति लोकम्।
न कर्मणा बालानां कर्मक्षयः, अपि
त्वकर्मणा धीराणाम्। ते हि मेधाविनः
परिग्रहातीताः, सन्तोषित्वात्। अतो
न ते पापं कुर्वन्ति। अतीतादिभावान्
यथार्थतया जानन्तः स्वयम्बुद्धास्ते
नेतारः कर्मान्तकृतो भवन्ति। जीवो-
पमर्दशङ्कया पापं जुगुप्समानास्ते
कृतादिभिस्तत् परिहरन्ति। सदा यता

धीरा संयमानुष्ठानतत्परा भवन्ति। यः स्वतः परतो वा ज्ञात्वोपदिशति परेभ्यः, स स्वपरत्राणायालं भवति, तं ज्योतिर्भूतं सदा सेवेत।

य आत्म-लोक-आगत्यनागति-शाश्वताशाश्वत-जाति-मरण-उपपात-नारकादिपीडा-आश्रव-संवर-दुःख-निर्जरा जानाति, स क्रियावादं भाषितुमर्हति।

शब्दादिषु रागाद्यकुर्वाणो जीवितमरण-योर्निःस्पृहः संयमगुप्तो वलयविमुक्तो भवति।

# याथातथ्यम्

## ॥१-१३॥

वक्ष्ये याथातथ्यम्। नानाप्रकारं पुरुष-स्वभावं सतः शीलादीतरस्य चेतरत् प्रादुःकरिष्यामि। नित्यसमुत्थितश्रुत-धरेभ्योऽवाप्य धर्मं तदुक्तसमाधिम-सेवमानाः केचिच्छास्तारमेव परुषं वदन्ति। स्वाभिप्रायेण तेऽन्यथा वदन्ति मोक्षमार्गम्। मृषां च वदन्ति ज्ञानशङ्कया। ते बहुगुणानामभाजनं भवन्ति। ये पृष्टाः स्वाचार्यं निह्नुवते ते

भ्रंशयन्त्यात्मानं ज्ञानादेः। साधुमानिनो–
ऽसाधवो मायाविन एष्यन्त्यनन्तं घातम्।

यः क्रोधनः खरपरुषभाषी पर्यवसितमपि कलहं पुनरुदीरयेत्। स पापी लघुप–थगतान्धवद् पीड्यते। कलहप्रियोऽनु–चितभाषी न मध्यस्थो भवति, नाप्यक–लहप्राप्तः। अत आचार्यनिर्देशकारी पापलज्जालुरेकान्तदृष्टिरमायश्च स्यात्। बह्वप्यनुशास्यमानो जात्यादिगुणोपेत ऋजुचारश्च स समोऽकलहप्राप्तश्च भवति।

यः संयमितपस्विमानी परमार्थमपरी–

क्ष्यात्मोत्कर्षार्थं वादं कुर्यात्, निरर्थकं चान्यं पश्यति, स एकान्तकूटेनात्मोत्क-र्षेण बम्भ्रमीति संसारे। नासौ जिनोक्त-मार्गस्थः।त्याज्यान्यतःसर्वमदस्थानानि, जात्यादेस्त्राणत्वविरहात्, सुचीर्णवि-द्याचरणयोरेव तत्त्वात्। मदिनाम-पारगत्वाच्च।

किञ्च तपस्व्यकिञ्चनोऽपि भिक्षुरात्म-श्लाघाभिलाषी चेत् तदाऽज्ञोऽसा-वाजीविकां कुर्वन् पुनः पुनरुपैति विपर्यासम्। यस्तु भाषागुणादिज्ञः

शोभनवाद्युत्पन्नप्रतिभो विशारद आगाढप्रज्ञः सुभावितात्मा च, सोऽपि चेत् प्रज्ञयाऽन्यपरिभवं कुर्यात्, तदा न समाधिप्राप्तः। वर्जयेदतो गर्वमन्यनिन्दां च। सुधीरधर्म्माणो न सेवन्ति सनिदानप्रयोगान्, गर्हितत्वात्।

ज्ञाततीर्थिकादिस्वरूप एव प्ररूपयेद् धर्मम्, तदश्रद्धया ततो मरणाद्यपाय-सम्भवात्।

धीरो विवेचयेत् कर्म स्वाभिप्रायं च। अपनयेद्द्विभावं सर्वतः।

# ग्रन्थः

## ॥१-१४॥

इह ग्रन्थं विहाय शिक्षमाण उत्थाय वसेत् सुब्रह्मचर्यम्। सदाऽऽज्ञाविधायी परिपालयेद्विनयम्। निपुणो न विविधं प्रमादं कुर्यात्। अपुष्टधर्मशैक्षं गच्छ-निस्सारितं पापिनो हरन्ति, पक्षिपोतवत्। अतः समाधिहेतुमिच्छेद् गुरुकुलवासम्। क्षुल्लकेन वृद्धेन वाऽप्यनुशासितो यः सम्यगपुनःकरणतया, न प्रतिपद्येत, सोऽपारगः। न च गृहिप्रभृतिभिरपि

प्रेरितस्सन् दूषयेन्मनः। न तेषु कुप्येत, न तान् पीडयेत्, नापि किञ्चिद्वदेत् परुषम्। अपि तु तथा करिष्यामीति स्वीकुर्यात्। श्रेयो म एतदिति मन्यमानो न पुनः प्रमादं कुर्यात्। वनेऽमूढकृतमूढानुशासनमिव श्रेय एव मे बुद्धानुशासनमिति मन्तव्यम्। अपि त्वमूढस्य तस्य मूढेन सविशेषयुक्ता कर्त्तव्या पूजा, एवं कृतज्ञतामत्राप्याह श्रीवीरः। उचितकाले जीवादिविषये प्रष्टव्य आचार्यः। यथोपदेशकारी जिनोक्तसमाधिं प्रवेशयेद् हृदये।

सद्बुद्ध्या धर्मप्रतिपादका बुद्धाः कर्मान्तकराः। ते च द्वयोरपि मोचनया पारगाः। उदाहरन्ति ते संशोधितम्। धर्मकथी न सूत्रार्थं परगुणांश्च छादयेत्, नापि विडम्बयेत्। न मानं सेवेत, नापि स्वगुणप्रकाशनं कुर्यात्। परिहरेत् परिहासमाशीर्वादवचश्च। मन्त्राद्या-जीविकां परिहरेत्। नासाधुधर्मान् संवादयेत्। न तथा धर्मं कथयेद्यथा परः शङ्केत। व्यागृणीयात् स्याद्वादं भाषाद्विकेन। नानवबुध्यमानं निर्भर्त्स-

येत्, अपि त्वकर्कशेन बोधानुगुणं कथयेत्। न परुषप्रश्नेऽपि तिरस्कुर्यात्। न स्तोकाभिधेयं महता शब्देन दीर्घयेत्। दुर्बोधं प्रतीत्य विस्तरतः समालपेत्। श्रोतृविशेषमाश्रित्य प्रतिपूर्णभाषी स्यात्। आचार्यादेः सकाशादर्थं श्रुत्वा सम्यगर्थदर्शी शुद्धवचनमागमानुसारेण वदेत्। एवं पापविवेकमभिसन्धयेत्। जिनोक्तान्यासेवनतोऽपि शिक्षेत। नातिवेलं वदेत्। स्वपरदर्शनज्ञो वदन् सम्यग्दर्शनं न दूषयेत्। एवम्भूतो जानाति

समाधिं भाषितुम्।

अपसिद्धान्तेन जिनोक्तमलूषयन् सिद्धान्तमनिह्नुवानः परिहरन्नुत्सूत्रं शास्तृभक्त्याऽनुविचिन्त्य वादं वदेत्। गुर्वादेः सकाशाद्यच्छ्रुतं तत्तथैव सम्यक् प्रतिपादयेत्। शुद्धसूत्र उपधानवान् तत्तद्गोचरधर्मज्ञ आदेयवाक्यः सदनु-ष्ठानकुशलो व्यक्तश्चार्हति समाधिं भाषितुम्।

# यदतीतम्

## ॥१-१५॥

यदतीतादि तत् सर्वं जानाति केवली। न स्याद्वादाऽऽख्याताऽसौ जैनेतरदर्शने। सत्यं स्वाख्यातं च तदुक्तम्। सदा सत्यसम्पन्नोऽसौ जीवमैत्रीं कुरुते। सा च हिंसावर्जनात्। भावनायोगशुद्धात्मा नौसदृशः, मोक्षतीरगत्वात्। न हि नवं कर्माकुर्वतः पुनरागमनं संसारे।

स्त्रियो ये न सेवन्ते, ते जना आदिमोक्षाः। तत्पाशोन्मुक्तास्ते नेच्छन्त्यसंयमम्,

वध्यप्रलोभनकल्पत्वात् स्त्रीप्रसङ्गस्य। संयमनिपुणस्त्रिविधं त्यजेत् केनचि-द्विरोधम्।

काङ्क्षाया अन्तको मनुष्याणां नेत्रभूतः। अन्तप्रान्ताहारादिभोजिनो धीरा भवान्तकराः। नामनुजानां सिद्धिः, सच्चारित्रपरिणामाभावात्। पण्डितः कर्मनाशप्रवर्त्तकवीर्यं लब्ध्वा धूनीयात् प्राक्कृतं कर्म। परिहरेच्च नवकर्मादानम्। सर्वसाधूनां यन्मतं तत् शल्यकर्त्तनम्। यत् साधयित्वा ते तीर्णा देवा वाऽभूवन्।

# षोडशम्

## ।।१-१६।।

सर्वपापकर्मविरतो रागादिरहितः समितः सहितः सदा यतः क्रोधमानवर्जितश्च साधु'र्माहन' इति वाच्यः।

अप्रतिबद्धोऽनिदानो हिंसादिकर्माश्रव-प्रतिविरतो दान्तः संयमी व्युत्सृष्टकायः 'श्रमण' इति वाच्यः।

मददैन्यरहितो नम्रो दान्तः संयमी व्युत्सृष्टकायः परीषहादिसहोऽध्यात्म-

योगशुद्धचारित्रः समुत्थितो मोक्षमा-र्गस्थितः सङ्ख्याय परदत्तभोजी 'भिक्षु'रिति वाच्यः।

रागादिरहितो मोक्षविद् बुद्धः सञ्छिन्नश्रोताः सुसंयतः सुसामायिक आत्मवादप्राप्तो विद्वान् सत्काराद्यनीहो धर्मार्थी धर्मविन् नियागप्रतिपन्नः समतां चरन् दान्तः संयमी व्युत्सृष्टकायो 'निर्ग्रन्थ' इति वाच्यः।

मिथ्यास्तु दुरुक्तं मम। शोधयन्तु बहुश्रुताः।

वि.सं.२०६८, माघकृष्णप्रथमा

# अथ
# द्वितीयश्रुतस्कन्धस्य

# पद्यमयः सारसञ्चयः

सूत्रकृतसूत्रकृतः, सूत्रधारं सुशासनम्।
श्रमणभगवद्वीरं, संस्तुत्य शिवदायकम्
॥१॥

इन्दिन्दिरायमाणं च, तच्चरणारविन्दयोः।
अद्वितीयद्वितीयाङ्ग-सृजं सुधर्मनायकम्
॥२॥

सूत्रकृताङ्गसूत्रस्य, श्रुतस्कन्धे द्वितीयके।
अर्थसङ्ग्रहणीं नाम्ना, सूत्रोपनिषदं ब्रुवे
॥३॥

अस्मिन्नध्ययनाःसप्त, पुण्डरीकाख्यमादिमम्।
द्वितीयकं क्रियास्थानं, अथाहारपरिज्ञका
।।४।।

प्रत्याख्यानक्रिया तुर्यमनाचारश्रुतं ततः।
आर्द्रकीयाभिधं षष्ठं, नालन्दीयं च सप्तमम्
।।५।।

पुष्करिणी भवेदेका, पद्मवरविभूषिता।
तस्मिन् मध्यपदे पद्म-वरपुण्डरीकं महत्
।।६।।

आहोपुरुषिकास्तब्धं, तत्र पुंसां चतुष्टयम्।
तत्पद्मग्रहणव्यग्रं, कर्दमे सन्निमज्जितम्
।।७।।

उभयतीरसम्भ्रष्टं, महत्पङ्कजवञ्चितम्।
दृष्ट्वा तद् भिक्षुराहैको, 'नैतत् पद्मग्रहे पटु
॥८॥

उत्खनिष्याम्यहं त्वेत' - दित्युक्त्वासौ तटस्थितः।
'पद्मोत्पत त्व' - मित्याह, तथा चक्रे सुपङ्कजम्
॥९॥

अत्रोपनय एवं या, पुष्करिणी जगत्तु सा।
यज्जलं तद् भवेत् कर्म, कामभोगास्तु कर्दमः
॥१०॥

जनास्तु पङ्कजान्यस्यां, स्यात्पद्मप्रवरं नृपः।
पुंसां चतुष्टयं त्वन्य-तीर्थिकाणां व्रजः स्मृतः
॥११॥

भिक्षुरत्र भवेद्धर्मः, राजपद्मोद्धृतिक्षमः।
धर्मतीर्थं तीरं प्रोक्तं, भिक्षुभाषा तु देशना
।।१२।।

उत्पातः पुण्डरीकस्य निर्वाणं विनिदर्शितम्।
समासेनोदितं ह्येतद् विशेषस्तु श्रुते श्रुतः
।।१३।।

अथ वक्ष्ये क्रियास्थानं, धर्माधर्मविभक्तिकम्।
धर्मीयमुपशान्तं स्या-दितरमितरं भवेत्
।।१४।।

आर्यादीनां मनुष्याणां, क्रियास्थानत्रयोदश।
तत्राद्यस्त्वर्थदण्डस्स्याद्, द्वितीयोऽनर्थदण्डकः
।।१५।।

हिंसादण्डस्तृतीयस्स्या–दकस्माद्दण्डकस्ततः।
पञ्चमो दृग्विपर्यासो, मृषाप्रत्ययिकस्तथा
।।१६।।

ततोऽपि सप्तमं स्थान–मदत्तादानप्रत्ययः।
अष्टमोऽध्यात्मिको दण्डो, नवमो मानप्रत्ययः
।।१७।।

दशमस्तु मित्रदोष – प्रत्ययिकस्तथोदितः।
मायाप्रत्ययिकस्त्वेका – दशमो द्वादशः पुनः
।।१८।।

लोभप्रत्ययिक ईर्या–प्रत्ययस्तु त्रयोदश।
'द्वादश परिहार्याणि', त्रयोदशमगा जगुः
।।१९।।

अष्टाङ्गलक्षणजीवि - पापविद्याप्रयोगिनः।
पापस्थानस्थितास्तेऽपि, गच्छेयुर्दुर्गतिं ध्रुवम् ॥२०॥

चौरा औरभ्रिकाश्चापि, मात्स्यिका धेनुघातकाः।
तथाविधा महापापा, गच्छेयुर्दुर्गतिं ध्रुवम् ॥२१॥

द्वितीयं धर्मधाम स्या-देकान्तसम्यगेव तत्।
यदाचर्य महापुंसः, प्राप्नुवन्ति परम्पदम् ॥२२॥

मिश्रस्थानं तृतीयं तु, स्यादधर्मबहुत्वतः।
अधर्मान्तर्भूतं मिथ्या, तापसप्रभृतेर्मतम् ॥२३॥

अन्यथा मिश्रधाम स्या-द्धर्मबहुलतान्वितम्।
धर्मान्तर्भूतमेवैत – च्छ्राद्धानां सुव्रतश्रियाम्
॥२४॥

उच्यतेऽविरतो बालो, विरतो यः स पण्डितः।
विरताविरतो यः स, उच्यते बालपण्डितः
॥२५॥

अधर्मिणो भवं यान्ति, यान्ति मुक्तिं सुधर्मिणः।
भवो द्वादशक्रियाभिः, परया स्यात्परम्पदम्
॥२६॥

अथाऽऽहारपरिज्ञाख्य-मध्ययनं तृतीयकम्।
विश्वविश्वजीवाऽऽहार – विषयज्ञापकं हि तत्
॥२७॥

बीजकायास्तु चत्वारो, बीजोत्तरपदान्विताः।
अग्रमूलपर्वस्कन्धा–स्तेषु केचिद्धुरारुहाः
।।२८।।

पृथिवीरूप आधारे, जायन्ते यान्ति वृद्धताम्।
तत्स्निग्धभावमाहारी–कृत्य तस्माद्धुरारूहाः
।।२९।।

ते च जलाग्निवायूनां वनस्पत्यात्मनामपि।
आहरन्ति शरीराणि, त्रसकायात्मनामपि
।।३०।।

एवं वृक्षरुहाः सन्ति, तद्रुहा अपि सन्ति भोः!।
तदंशाः सन्ति मूलाद्या – स्तदारोहाश्च वल्लयः
।।३१।।

अध्यारोहरुहाः सन्ति, तद्रुहा अपि सन्ति भोः!।
तदंशाः सन्ति मूलाद्या, ज्ञेयमेवं तृणाद्यपि
।।३२।।

एवमेव जलाधारा, ज्ञेया उक्तानुसारतः।
अथोच्यन्ते मनुष्या ये, सन्ति मैथुनसम्भवाः
।।३३।।

आहारयन्ति प्रागेते, शुक्रशोणितपुद्गलान्।
ततोऽपि जननीजग्धान्, ततोऽपि जननीपयः
।।३४।।

ततो धान्यादिकान्नाना – त्रसात्रसवपुंष्यपि।
भक्षयन्ति नरान् केचित्, यथा प्रोक्तं परैरपि
।।३५।।

अस्ति मत्स्यस्तिमिर्नाम, अस्ति मत्स्यस्तिमिङ्गिलः।
तिमिङ्गिलगिलोऽप्यस्ति, तद्गिलोऽप्यस्ति भारत!
॥३६॥

जलचरचतुष्पाद – भुजोरःसर्पिखेचराः।
एवं ज्ञेया य एष्वस्ति, विशेषः स श्रुते श्रुतः
॥३७॥

मनुष्यादिशरीरेषु, यूकाकृम्यादयः स्मृताः।
मञ्चकाद्येष्वचित्तेषु, भवन्ति मत्कुणादयः
॥३८॥

संस्वेदजा अपि ज्ञेयाः, कुन्थुपिपीलिकादयः।
अग्निवायूद्भवा जीवा, मूषिकाद्याश्च सन्ति भोः!
॥३९॥

मूत्रविष्टाभवा कीटाः, सन्ति चर्मकीटास्तथा।
तिर्यग्देहे स्थितास्तत्र, शोणितं भक्षयन्ति ये
॥४०॥

उदकयोनिकाः सन्ति, जीवा उदकलक्षणाः।
तज्जानि सन्ति नीराणि, तज्जा ज्ञेयास्त्रसा अपि
॥४१॥

इत्थं तेजःसमीराश्च, ज्ञेयाः स्वस्वसमुद्भवाः।
त्रसादिषु च जायन्ते, पृथिवीशर्करादयः
॥४२॥

यत्र जीवास्तु जायन्ते, तदेवाहारयन्ति ते।
एतद्विज्ञाय वैराग्यं, कस्य न स्यात् सचेतसः?
॥४३॥

भूयादाहारगुप्तोऽतः, संयमयतनापरः।
उक्ताऽऽहारपरिज्ञाऽथ, प्रत्याख्यानांश उच्यते ।।४४।।

व्यक्तमनोवचःकाय-हीनो जीवोऽपि पापभाक्।
नित्यं हिंसादिदुष्टत्वाद्, वधकोऽत्र निदर्शनम् ।।४५।।

वधकः स्याद्यथा कश्चि-दीक्षमाणो वधक्षणम्।
सुप्तोऽपि स यथा पापी, तथैवात्रापि दृश्यताम् ।।४६।।

चालनाप्रत्यवस्थाने, ह्यत्र ये ते श्रुते श्रुते।
आत्मोपमामतः कृत्वा, जीवा हिंस्या न केचन ।।४७।।

अनाचारश्रुतस्याथ, पञ्चमस्यांश उच्यते।
नाचरेत् क्वाप्यनाचारं, गृहीतजिनशासनः
।।४८।।

पश्येदेकान्तनित्यं वाऽनित्यं वापि जगन्न हि।
अव्यवस्था यतश्चैव-मनाचारोऽप्यतो भवेत्
।।४९।।

विश्वमुक्तिरथामुक्तिः, सर्वहिंसा समाऽसमा।
आधाकर्मभुजां बन्धोऽबन्ध इत्यादि नो वदेत्
।।५०।।

लोकालोक - जीवाजीव - धर्माद्या अपि सन्ति न।
नैवं नास्तिक्यवादी स्यात्, स्यादास्तिक्यैकपावनः
।।५१।।

आर्द्रकीयमथः षष्ठं यत्रार्द्रककुमारकः।
गोशालकसौगतर्षि – ब्रह्मव्रतित्रिदण्डिभिः
।।५२।।

यं वादं कृतवान् हस्ति – तापसैश्च विशुद्धगीः।
स श्रुते प्रोदितो ज्ञेय–स्तत एव ज्ञतार्थिभिः
।।५३।।युग्मम्।।

नालन्दीयाभिधं ह्यन्त्य–मध्ययनमथ ब्रुवे।
नालन्दायां स्थिता आसन्, श्रीवीरगौतमर्षयः
।।५४।।

तदा श्रीगौतमस्वामि – पार्श्वे पार्श्वेश्वरव्रती।
आगत उदकाख्यो योऽब्रवीद् व्रतवचःक्षतिम्
।।५५।।

“स्थावरा अपि जीवा ये, तेऽप्यभूवन् त्रसाः पुरा।
तद्धिंसायामपि तस्मात् त्रसाहिंसाव्रतक्षतिः
।।५६।।

अतो वाच्यं त्रसभूत–प्रत्याख्यानं त्रसस्य न।
अनन्तरोक्तदोषेण”, अथाहुः स्वामिगौतमाः
।।५७।।

“भवतां त्रसभूता ये त्रसास्त एव सन्ति नः।
इत्थं द्वयोरपि साम्ये, क एकत्राऽऽग्रहस्तु वः”
।।५८।।

स्वपक्षः प्रभृतैर्ज्ञातैः, श्रीगौतमैः समर्थितः।
ततो निरुत्तरीभूतः, प्रस्थितोऽनादरेण सः
।।५९।।

तदोवाच विभुर्यस्तु, श्रमणमाहनान्तिकात्।
शृणोति धार्मिकं ह्येकमपि वचः शिवङ्करम्
।।६०।।

तस्यादरं विधत्ते स, कृतोपकारवेदकः।
वन्दनं नमनं तस्य, सत्कारादि करोति सः
।।६१।।

स साक्षान्मम कल्याणं, स साक्षान्मम मङ्गलम्।
सोऽस्ति मे दैवतं साक्षात्, साक्षाच्चैत्यं स मे खलु
।।६२।।

एवं मत्वा स्तवीत्येनं, पर्युपास्त इति स्थितिः"।
श्रुत्वैतदनुतापी स, उदकः श्रद्दधाति तत्
।।६३।।युग्मम्।।

ततः स प्रतिपेदे श्रीवीरस्य पादपद्मयोः।
पञ्चमहाव्रतान्युक्त–मध्ययनमपश्चिमम्
।।६४।।

द्वितीयस्यागमस्यैवं, श्रुतस्कन्धे द्वितीयके।
सङ्ग्रहणी समाप्तेयमर्थलेशाभिधायिनी
।।६५।।

यया प्राक् श्रुतजिज्ञासा, पश्चात्स्याच्छ्रुतधारणा।
आगमाध्ययनस्यात, एषा स्यादुपकारिणी
।।६६।।

दुःसन्दृब्धं चेदत्र स्यात्, स्याच्छ्रुताविनयो यदि।
तत् क्षमायाचनां कुर्वे, मिथ्या मे दुष्कृतं भवेत्
।।६७।।

प्रकृत्योपकृतिप्रष्ठाः, शोधयन्तु बहुश्रुताः।
मङ्गलं भगवान् वीरः, सुधर्मेशोऽस्तु मङ्गलम्
॥६८॥

મારા નાથ!
શું નથી આપ્યું તે?
ખરેખર,
ન્યાલ કરી દીધો મને.

# *Don't Miss it.*



## સુકૃત સહયોગી

# શ્રી સુભાનપુરા શ્વે. મૂર્તિ. જૈન સંઘ

સુભાનપુરા, વડોદરા

જ્ઞાનનિધિમાંથી લાભાર્થી બનવા બદલ
શ્રી સંઘ તથા ટ્રસ્ટીઓની
ભૂરિ ભૂરિ અનુમોદના

૧૨૦